मन्त्रेषु गुणानां भूयस्त्वात् गुणानां बाहुल्यात् यतः चोदनापाठापेक्षया मन्त्रेषु बहवो गुणा विद्यन्ते। तद्यथा कर्मकाले उच्चारणे पदार्थस्मारकैर्यतो मन्त्रा अर्थवादादिकृतव्यवधानरहिताः क्रमेण पठ्यन्ते तेनोत्तरमुत्तरं पदार्थं झटिति स्मारयितुं शक्नुवन्ति नैवं चोदनापाठः विधेयार्थस्तावकवाक्यसंदर्भव्यवहितत्वेन मन्त्रवत्स्मारयितुमशक्तत्वात्। न च कर्मकाले तस्योच्चारणं विहितं मन्त्रवत्। श्रुतिरपि मन्त्राणां गुणभूयस्त्वमाह "तस्मादेतदृषिणाभ्यनूक्तमित्यादिना(शत॰ब्रा॰१।७।४।४।)यो हि स्वप्रतिपादितस्यार्थस्य प्रामाण्यार्थमन्यस्योक्तिं प्रदर्शयति स आत्मापेक्षया उत्कृष्टस्यैव दर्शयति न निकृष्टस्य तेन गुणभूयस्त्वं मन्त्रेषु अतो मन्त्रपाठ एव बलवानिति सिद्धम्। पदार्थानां क्रमनियमे श्रुत्यादीनि तानि प्रमाणान्युक्तानि तेषां विरोधे बलाबलं चोक्तम् अथेदं चिन्त्यते। यत्र बहूनि प्रधानानि सह क्रियन्ते यथा दर्शपूर्णमासयोराग्नेयोपांशुयाजाग्नीषोमीयैन्द्राग्नादीनि यथा चातुर्मास्यपर्वसु वाजपेयेऽतिरात्रपशुवशापृश्निसप्तदशप्राजापत्येषु च तत्राराडुपकारकाण्यङ्गानि सर्वेषां तन्त्रेण क्रियन्ते इति। वक्ष्यति कर्म्मणां युगपद्भावस्तन्त्रमित्यत्र(कात्या॰१।७।१।)तेन न तेषु क्रमचिन्ता संनिपत्योपकारकाणि तु द्रव्यसंस्काररूपाणि प्रतिप्रधानभेदेन कर्त्तव्यानि तत्र चिन्त्यते तानि किमेकस्य सर्वाणि कृत्वापरस्य कर्त्तव्यानि? किं वा समान एकैकः पदार्थः सर्वेषां कर्त्तव्यः? इति। तत्रैकैकं प्रधानमन्यरहितानि स्वाङ्गान्यपेक्षते तस्मादङ्गानां प्रधानकालत्वस्य न्याय्यत्वादेकैकस्मिन् गुणकाण्डसमाप्त्यात् इतरथा हि पदार्थानुसमये सति स्वप्रधानाद्विप्रकृष्येरन् यद्येकस्यासादनं कृत्वापरस्य तदैव क्रियते तदा पूर्वस्यासादनयोर्व्यवायः स्यात् सहवचनं त्वाराडुपकारकसाहित्यमात्रेणाप्युपपद्यते तस्मात्काण्डानुसमय एवेति प्राप्ते आह" भा॰ "तुल्यसमवाये सामान्यपूर्वमानुपूर्व्ययोगात्" १०सू॰। "तुल्यसमवाये तुल्यानां प्रधानानां सह प्रयोगे द्रव्यसंस्काररूपाणि संनिपत्योपकारकाण्यङ्गानि सामान्यपूर्वं कर्त्तव्यानि पूर्वः पूर्वः पदार्थः सर्वेषां समानः सदृशः कर्त्तव्यः। तद्यथा बहुषु हविःषु प्रथमं सर्वेषां विभक्तीकरणम् ततः सर्वेषां पात्रीस्थापनम् ततः सर्वेषां तत्र व्यभिचारः ततः सर्वेषां पात्र्युपस्तारः ततः सर्वेषामुद्वासनम् ततः सर्वेषां वेद्यामासादनम् ततः सर्वेषामालम्भः इत्येवं पदार्थानुसमयः कर्त्तव्यः। यद्येकैकस्मिन् गुणकाण्डसमपवृज्यते तथा सति क्रमेण प्रयोगात् प्रयोगवाक्यावगतस्य साहित्यस्य बाधः स्यात् न हि वचनेनाविशेषतः साहित्यमवगम्यमानं काल्पनिकेन प्रधानासत्तिमात्रेणाराडुपकारकविषयमात्रं कल्पयितुं शक्यते। तस्मात्पदार्थानुसमयः। कुतः? आनुपूर्व्ययोगात् पदार्थानां तन्मन्त्राणां च एवं क्रियमाणे पदार्था आनुपूर्व्येण अनुक्रमेण युज्यन्ते तन्मन्त्राश्च अन्यथोत्तरपदार्थकरणानन्तरं पूर्व्वेषु क्रियमाणेषु आनुपूर्व्ययोगो न स्यात्। "पौर्णमास्यां पौर्णमास्या यजेत" इत्यनेन वाक्येन पौर्णमासीशब्दबोध्यानां तत्सम्बद्धानां त्रयाणां यागानां साङ्गानामेककालप्रयोगोऽवगम्यते अतो यस्मिन्नेव क्षणे एकस्याभिमन्त्रणं कर्त्तव्यमापतति तस्मिन्नेवापरस्याभिमन्त्रणं कर्त्तव्यं तदशक्यतया केवलं न क्रियते द्वितीये तु क्षणे न कश्चिद्धेतुर्येन पुरोडाशान्तरं नाभिमन्त्रयेत अतः प्रथमं पदार्थं सर्व्वेषां कृत्वा ततो द्वितीयादिः पदार्थः सर्व्वेषां कर्त्तव्यः। एवं बहुषु प्रधानेषु सर्व्वत्र पदार्थानुसमय एव न्याय्यो न काण्डानुसमयो इति स्थितम्। यत्र तु प्रधानविरोधो भवति पदार्थानुसमये क्रियमाणे। तत्र काण्डानुसमय एवेति वाचनिकेन साहित्येन पदार्थानुसमयः प्राप्तोऽपि प्रधानविरोधात्त्यक्तव्यः। पुरोडाशाङ्गं ह्यधिश्रयणादयः तदङ्गं च क्रमः पदार्थानुसमयरूपः तदाश्रयणे च तप्तकपालसंयोगात् पुरोडाशदाहप्रसङ्गः। न चाङ्गानुरोधेन प्रधानबाधो युक्तः। तेनातिबहुषु हविःष्वेकैकस्य पुरोडाशस्याधिश्रयणं प्रथनमद्भिरभिमर्शनं चेत्यन्तं काण्डानुसमयः कार्यः। यत्र तु नास्ति प्रधानबाधः द्वित्रिचतुरादिहविःषु, तत्र भवतु पदार्थानुसमयः। दाहसम्भवशङ्कायां तु उद्वासनमपि व्युत्क्रमेण कार्य्यम् यदुक्तम् पूर्व्वस्य पदार्थे कृते तस्मिन्नेव द्वितीयस्य क्रियमाणे पूर्व्वस्य व्यवधानमिति तत् सहत्वविधिबलात् परिह्रियते। एवं च सति वाजपेये आग्नेयैन्द्राग्नसारस्वतीवशापृश्निसप्तदशप्राजापत्येषु द्वाविंशतिसंख्येषु पशुष्वेकविंशत्या पदार्थैः समानासमानजातीयैर्व्यवधानमिष्यते न न्यूनाधिकैः। अन्ये त्वसमानजातीयैरेव। अनेनैव मुख्यक्रमप्रवृत्तिक्रमावुक्तौ भवतः। तथाहि यत्र बहूनि प्रधानानि भवन्ति तत्र यो मुख्यानां प्रधानानां क्रमस्तेनैव क्रमेण तदङ्गानां क्रमो भवति यथा पौर्णमास्यां प्रथममाग्नेययागः ततोऽग्नीषोमीययागः अत आग्नेयस्य प्रथमं ग्रहणम् ततोऽग्नीषोमीयस्य, एवं